Topic 64

# चुरादिगणः

चुर स्तेये ।

सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच्

णिचश्च ।

णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । णिश्रि-० इति चङ् । णौ चङि-० इति ह्रस्वः । चङि-० इति द्वित्वम् । हलादिः शेषः । दीर्घो लघोः -० इत्यभ्यासस्य दीर्घः । अचूचुरत् । अचूचुरत । कथ वाक्यप्रबन्धे ।
अल्लोपः

यदि क्रिया का फल कर्तृगामी हो तो णिजन्त के बाद आत्मनेपद आता है। उदाहरण के लिए णिजन्त 'चोरि' में यदि 'चुर' का फल कर्ता को मिलता हो तो लट् लकार के प्रथमपुरुष एकवचन में 'चोरि' के बाद आत्मनेपद प्रत्यय 'त' होगा। पूर्ववत् 'चोरयते' रूप बनता है।

अचः परस्मिन् पूर्वविधौ ।

परनिमित्तोऽजादेशः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इति स्थानिवत्त्वान्नोपधावृद्धिः । अकथयत् । अग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचकथत् । गण संख्याने । गणयति ।

ई च गणः ।

गणेरभ्यासस्य ईत् स्याच्चङ्परे णौ चादत् ।
अजीगणत्, अजगणत्